International Journal of Sanskrit Research 2024; 10(2): 10-13

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(2): 10-13
© 2024 IJSR
www.anantaajournal.com
Received: 08-12-2023
Accepted: 13-01-2024

**गीताराणी बारिक्**
शोधच्छात्री - शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतविश्वद्यालयः, तिरुपतिः, आन्ध्र प्रदेश, भारत

**Corresponding Author:**
**गीताराणी बारिक्**
शोधच्छात्री - शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतविश्वद्यालयः, तिरुपतिः, आन्ध्र प्रदेश, भारत

# राष्ट्रियशिक्षानीतिम्(२०२०)अभिलक्ष्य प्राथमिकशिक्षायाः स्वरूपम्

**गीताराणी बारिक्**

**सारांशः**
स्वतन्त्रताप्राप्त्यनन्तरम् अस्माकं देशे बहुपरिवर्तनं सञ्जातम्। राष्ट्रियशिक्षाप्रणाल्याः विकासाय भारतसर्वकारेण समये समये विविधशिक्षाऽऽयोगाः नियुक्ताः। शिक्षायाः विविधस्तराणां क्षेत्राणाञ्च पृथक् अध्ययनम् अत्यावश्यकं वर्तते। चतुर्दशवर्षीयाणां बालकबालिकानां कृते अनिवार्यरूपेण निःशुल्कशिक्षाप्रदानमेव अस्माकं साम्बिधानिकलक्ष्यं भवति। सार्वजनिकशिक्षायाः विकासाय 'समानविद्यालयप्रणाली' (Common school system) राष्ट्रियलक्ष्यरूपेण स्वीकर्तव्या। शिक्षायाः सर्वेषु स्तरेषु सामाजिकी राष्ट्रिया च सेवा सर्वेषां कृते अनिवार्या विधेया।
राष्ट्रियशिक्षानीतिः २०२०एकविंशतिशताब्द्याः प्रथमशिक्षानीतिः अस्ति। अस्याः लक्ष्यम् अस्माकं देशस्य विकासार्थम् अपेक्षितावश्यकतानाम् पूरणम्।

**कुटशब्दाः** राष्ट्रियशिक्षानीतिः, प्राथमिकशिक्षा, निशुल्कशिक्षा, सार्वजनिकशिक्षा

## प्रस्तावना

विद्यालयशिक्षाप्रणाल्याः प्राथमिकलक्ष्यम् छात्राणां नामाङ्कनं, नियमितरूपेण विद्यालये उपस्थितिः इति। राष्ट्रियशिक्षानीतेः प्रमुखं लक्ष्यद्वयं भवति। यथा- विद्यालयत्यक्तानां बालानां पुनरानयनम्, अग्रे बालानां विद्यालयस्य त्यागे अवरोधश्च। इयं राष्ट्रियशिक्षानीतिः भारतीयनीतौ मूलरूपेण अन्तर्निहितानां शिक्षाप्रणालीं निरूपयति एवं भारतस्य शिक्षाप्रणालीं परिवर्तयितुं योगदानं प्रयच्छति, अर्थात् इयं नीतिः निरूपयति यत् अस्माकं शैक्षिकसंस्थानां पाठ्यक्रमः, पाठ्यचर्या शिक्षणविधिश्चछात्रेषु मूलभूतकर्तव्यानि, संविधानिकमूल्येषु गौरवम्, देशाभिमानं, परिवर्तमाने जगति नागरिकाणां भूमिकाम्, उत्तरदायित्वानि च सञ्चारयति इति।

राष्ट्रियशिक्षानीतिः अधुना विद्यमानां १०+२ विद्यालयव्यवस्थां ३ वर्षतः १८ वर्षं यावत् सर्वेषां छात्राणां कृते पाठ्यचर्याधारेण शिक्षणाधारेण च ५+३+३+४ इति नूतनव्यवस्थायां परिवर्तयितुं मार्गं प्रदर्शयति ।

**१. राष्ट्रियशिक्षानीतेः (२०२०) प्राथमिकशिक्षायाः स्वरूपम् –**

अधुना ३ तः ६ वर्षीयाः छात्राः १०+२ व्यवस्थायाम् अन्तर्भूताः नासन् यतः ६ वर्षे ते प्रथमकक्षायां प्रविशन्ति। नवीन - (५+३+३+४) व्यवस्थायां त्रिवर्षीयच्छात्राः अपि समाविष्टाः एवं प्रारम्भिकबाल्यावस्थापालनं शिक्षा च दृढाधारे समावेशितम्, येन बालानाम् उत्तमसर्वतोमुख्यध्ययनस्य विकासस्य, योगक्षमस्य च अभिवृद्धेः लक्ष्यं साधयितुं शक्यते। आयोगेन प्राथमिकशिक्षायाम् अपव्ययस्य अवरोधनस्य च निराकरणे बलं प्रदत्तम्।

**इदानीन्तनकाले शिक्षायाः**

क्षेत्रं बहुविस्तृतं जातम् । विविधविषयाणां पुनर्निर्माणाय पाठ्यक्रमे परिवर्तनस्य आवश्यकता वर्तते । पाठ्यक्रमस्य परिष्करणाय आयोगेन मुख्यरूपेण एते अंशाः समाविष्टाः यथा - बहुमुखीनैतिकस्तरः, क्रीडाधारितम्, गतिविध्याधारितम्, चिन्तनाधारिताध्ययनम्, वर्णमाला, भाषाः, संख्यागणनम्, प्रहेलिकाः, तार्किकचिन्तनम्, समस्यापूर्तिः, रेखाचित्रम्, वर्णचित्रम्, दृश्यकलाः, शिल्पम्, नाटकम्, पुत्तलिकानिर्माणम्, संगितम्, चलनं च। बालानां शारीरिकभौतिकविकासः, संज्ञानात्मकविकासः, समाजसंवेगात्मकनैतिकविकासः, सांस्कृतिकविकासः, संवादार्थं प्रारम्भिकभाषा, साक्षरता, संख्यात्मज्ञानम् इत्यादिषु उत्तमपरिणामस्य प्राप्तिः।

**२. राष्ट्रियशिक्षानीतौ विद्यालयशिक्षा**

राष्ट्रियशिक्षानीतिः अधुना विद्यमानां १०+२ विद्यालयीयव्यवस्थां ३ वर्षतः १८ वर्षं यावत् सर्वेषां छात्राणां कृते पाठ्यचर्याधारेण शिक्षणाधारेण च ५+३+३+४ इति नूतनव्यवस्थां परिकल्पयितुं पथपरिष्कारं करोति। यथा अधः मानकचित्रं प्रदत्तमस्ति अपि च विषयेऽस्मिन् चतुर्थाध्याये विस्तृतविवरणं प्रदत्तं वर्तते । अधुना ३ तः ६वर्षीयाः छात्राः १०+२ इति व्यवस्थायाम् अन्तर्भूताः नासन् , यतः ६ वर्षे ते प्रथमकक्षायां प्रविशन्ति। नवीन ५+३+३+४ इति व्यवस्थायां त्रिवर्षीयच्छात्राः अपि समाविष्टाः एवं प्रारम्भिकबाल्यावस्थापालनं शिक्षा च दृढाधारे समावेशितम्, येन बालानां उत्तमसर्वतोमुख्यध्ययनस्य, विकासस्य, योगक्षेमस्य च वृद्धेः लक्ष्यं प्राप्तुं शक्यते ।

**३. राष्ट्रियशिक्षानीतेः प्रारम्भिकबाल्यावस्थापालनं शिक्षा च**

अधुना उत्तमं प्रारम्भिकबाल्यावस्थापालनं शिक्षा च कोटिसंख्याकेभ्यः बालेभ्यः विशेषतया सामाजिकार्थिकप्रतिकूलपरिस्थितौ विद्यमानेभ्यः नोपलभ्यते। अतः इत्यत्र दृढनिवेशः सर्वेभ्य बालेभ्यः अत्र प्रवेशप्रदानार्थं सामर्थं स्थापयति इदम् आजीवनं प्रफुल्लतया शिक्षणव्यवस्थायां भागग्रहणाय अवसरं कल्पयति। प्रारम्भिकवाल्यावस्थाविकासः, पालनम्, शिक्षा च गुणवत्तापूर्णेन सार्वत्रिकरूपेण यथाशीघ्रं २०३०तः पूर्वं प्रयच्छेत् ,येन इदं निश्चितं स्यात् प्रथमकक्षायां प्रवेशार्थं सर्वे वालकाः सज्जाः सन्ति । अष्टवर्षीयबालकानां कृते प्रारम्भिकवाल्यावस्थापालनस्य शिक्षायाः च कृते राष्ट्रियपाठ्यक्रमः शिक्षणतन्त्रम् इत्यस्य विकासः NCERT संस्था क्रियते । NCERT इति संस्थया प्रारम्भिकवाल्यावस्था शिक्षां भागद्वयं क्रियते । तद्यथा- ० तः ३ वर्षीयबालकानां कृते एकम् उपतन्त्रं च विद्यते, अन्यत् ३ तः ८ वर्षीय बालकानां कृते एकम् उपतन्त्रं विद्यते । मातापितरौ प्रारम्भिकबाल्यावस्थापालनशिक्षासंस्था इत्युभयोः कृते इदं तन्त्रं प्रमुखमार्गदर्शकरूपेण कार्यं क्रियते। संपूर्णदेशे स्तरानुगुणं सर्वोत्तम ECCE इत्यस्य प्रमाणम् एकं वृहल्लक्ष्यं वर्तते। मुख्यतया सामाजिकार्थिकरूपेण क्षतिग्रस्तेभ्यः स्थानेभ्यः जनपदेभ्यः च विशेषावधानं दीयते । इयं परिकल्पना यत् पञ्चवर्षपर्यन्तः प्रत्येकं बालः ECCE अर्हशिक्षकयुक्तां सज्जात्मककक्षाम् अथवा बालवाटिकां प्रविशेत् इति।

सज्जात्मककक्षायाः अध्ययनं क्रीडात्मकाध्ययनाधारितं भवति। अपि च ज्ञानात्मकस्य, प्रभावपूर्णस्य, चिन्तनासामर्थाधारितस्य साक्षरयुतस्य च विकासाय अधिकम् अवधानं प्रदीयते। मध्याह्नभोजनकार्यक्रमः प्राथमिकविद्यालयेषु सज्जात्मककक्षापर्यन्तं विस्तारितः भवेत्। अङ्गनवाडिव्यवस्थायां सज्जात्मककक्षाबालकानां कृते उपलभ्यमानम् आरोग्यपरीक्षणम्, स्वास्थ्यविकासनिरीक्षणं च प्राथमिकविद्यालयेषु अपि उपलब्धिः भवेत्। राष्ट्रियशिक्षानीति २०२० आधारेण विद्यालयपरित्यक्तच्छात्राणां संख्यायां न्यूनीकरणम्, तथा च शिक्षणस्य सर्वेषु स्तरेषु सार्वत्रिकरूपेण प्रवेशस्य निश्चयः भवति। विद्यालयशिक्षाप्रणाल्याः प्राथमिकलक्ष्यं छात्राणां नामाङ्कनं, नियमितरूपेण विद्यालये छात्राणाम् उपस्थितिः इति विषये वर्तते । सर्वशिक्षाभियानं शिक्षाधिकाराधिनियमः इत्याद्युपक्रमैः भारतेन सद्य वर्षेषु प्राथमिकशिक्षायां छात्राणां नामाङ्कने अधिकप्रगतिः अस्ति। तथापि आगामिश्रेण्यां दत्तांशाः विद्यालयप्रणाल्यां छात्राणां धारणादिगभीरसमस्यां सूचयन्ति। षष्ठकक्षातः अष्टमकक्षां यावत् जीईआर् ९०.९ प्रतिशतं विद्यते, किन्तु नवमदशमकक्षयोः एकादशद्वादशकक्षयोः च कृते क्रमात् ७९.३ प्रतिशतं ५६.५ प्रतिशतम् एव, अयम् अनुपातः सूचयति यत् कथं पञ्चमकक्षायाः परं तथा विशेषतया अष्टमकक्षायाः परं नामाङ्किताः विद्यार्थिनः विद्यालयशिक्षां त्यजन्ति इति । अनेन सह २०३० वर्षं यावत् पूर्वविद्यालयतः माध्यमिकविद्यालयस्तरं यावत् शतप्रतिशतं पूर्णनामाङ्कनानुपातस्य प्राप्तिलक्षेन सह अधिकविद्यार्थिनां विद्यालयशिक्षातः त्यागस्य वारणमपि करणीयम्। पूर्वप्राथमिकविद्यालयतः द्वादशकक्षां यावत् व्यवसायिकशिक्षणेन सह गुणवत्ताशिक्षणं प्राप्तुं देशस्य सर्वेषां छात्राणां प्रवेशार्थम् अवसरप्राप्तये च दृढराष्ट्रस्तरीयप्रयासः क्रियते। आहत्य उपक्रमद्वयं कर्तुं शक्यते यत् विद्यलयत्यक्तानां बालानां पुनरानयनम्, अग्रे बालानां विद्यालयस्य त्यागे अवरोधश्च ।

बालानाम् अधिगमस्य संवर्धनाय स्वयंसेविप्रयत्नेषु प्राक्तनच्छात्राणां समुदायस्य च अन्तर्भावः क्रियते। तत्र विद्यालयेषु प्रत्येकं विद्यार्थिनः कृते बोधनम्, साक्षरताशिक्षणस्य अन्यसहायार्थं च अतिरिक्तकक्षाणाम् आयोजनम्, शिक्षकेभ्यः शिक्षणस्य मार्गदर्शनं प्रोत्साहनं च विद्यार्थिनां कृते प्रदानम् ।

**४. राष्ट्रियशिक्षानीतिः २०२० आधारेण विद्यालयेषु पाठ्यक्रमाः -:**

नवीनशिक्षानीत्याधारेण ५+३+३+४ इति विद्यालयपाठ्यक्रमस्य संशोधनं भवति। विद्यालयशिक्षापाठ्यक्रमस्य संशोधनं कृत्वा विविधे स्तरे विभज्यते । ते यथा- ३-८, ८-११, ११-१४, १४-१८ वयः स्तरे विभाजनं क्रियते। विद्यार्थिनां विकासस्य भिन्नभिन्नस्तरानुगुणं तेषां रुच्यनुगुणं च अपेक्षितविकासार्थं समुचितलक्ष्यं प्रदातुं शक्यते। राष्ट्रियशिक्षानीतेः २०२० आधारेण प्राथमिकशिक्षायाः वयः भवेत्- ११ वर्षं यावत्। अर्थात् प्राथमिकशिक्षा अङ्गनवाडीतः पञ्चमकक्षापर्यन्तं भवेत् । अस्यां कक्षायां पाठ्यक्रमः आनन्ददायकं तथा रुचिकरं मनोहरं च भवेत्। प्राथमिकशिक्षापाठ्यक्रमः छात्राणां नैतिकविकासः, भाषागतविकासः, सामाजिकविकासः, मानसिकविकासः, शारीरिकविकासः च आधारेण भवति। इत्यस्य कारणात् छात्राणां पठितुं मनोभावं वृद्धिः जायते। प्राथमिकस्तरे आनन्दितं भूत्वा तथा नृत्य-संगीत-क्रिडाधारेण श्रेण्याम् अध्ययनम्। छात्राणां मानसिकविकासार्थं तथा शिक्षणे अभिरुच्यर्थम् अध्यापकः विभिन्न-चित्रमाध्यमेन, अभिनयमाध्यमेन, टेलिभिजनमाध्यमेन च विभिन्नविधिनां कक्षायां प्रयोगः क्रियते । प्राथमिकस्तरस्य पाठ्यक्रमशिक्षणशैल्यनुरूपं विषयनिर्माणं भवति। अस्मिन् स्तरे विद्यार्थिनाम् अपेक्षितसज्जां कर्तुम् अत्र विभिन्नविषयाः भवन्ति। ते यथा - विज्ञानं, गणितं, कला, सामाजिकविज्ञानं, मानवीयशिक्षा, मातृभाषा। प्रत्येकं विषये प्रायोगिकं शिक्षणं, विभिन्नविषयैः सह अन्तः सम्बन्धस्य अन्वेषणम् इत्यादिनाम् अधिकविशिष्टविषयाणां शिक्षकाणाम् उपलब्धौ अपि प्रोत्साहनं क्रियते ।

**निष्कर्षः**

शिक्षणे अधिकं बलं ददन् शिक्षकेन कक्षायां विद्यालये च एतादृशं वातावरणं निर्मितव्यं यत्र छात्राः स्वस्य सृजनत्मकतायाः बहवः विषयाः शिक्षन्ति। इयं राष्ट्रियशिक्षानीतिः (२०२०) २१ शताब्द्याः

प्रथमा शिक्षानीतिः अस्ति। तथा च अस्माकं देशस्य अनेकाः वर्धमानाः विकासात्मकाः अनिवार्यताः सम्बोधयितुं शक्यते। एषा नीतिः शिक्षासंरचनायाः सर्वेषां पक्षानां पुनः निरीक्षणं पुनर्निर्माणं च प्रस्तावयति, यत्र तस्य नियमनं शासनं च समाविष्टं भवति। नूतनशिक्षानीतिः शिक्षकान् सर्वेषु स्तरेषु अस्माकं समाजस्य सर्वाधिकसम्मानीतानाम् अत्यावश्यकानां च सदस्यानां रूपेण पुनः स्थापनार्थं साहाय्यं कर्तुं शक्नोति। यतः ते अस्माकम् अग्रिमसम्भूतानां नागरिकानां कृते यथार्थतया आकारं ददति ।

## सन्दर्भ


1. गुप्ता . एस . पी . (२०२०) अनुसन्धान संदर्शिका शारदा पुस्तक भवन, प्रयागराज
2. पाण्डेय, के. पी. (२००८) शैक्षिक अनुसंधान, विश्वविद्यालय प्रकाशन, वाराणसी
3. Pathak R. National Education Policy 2020: Can it improve Faculty Motivation and Academic Outcomes in India. International Research Journal of Modernization in Engineering Technology and Science; c2021.
4. Tilak JB (Ed.). Education in India: Policy and Practice. Sage Publications Pvt. Limited; c2021.
5. Kannan V. National Education Policy (NEP) 2020 and SCSVMV. CSI Transactions on ICT; c2021.
6. Ministry of Human Resource Development. National Education Policy 2020. Government of India; c2020.
7. Aithal PS, Aithal S. Analysis of the Indian National Education Policy 2020 towards Achieving its Objectives. International Journal of Management, Technology, and Social Sciences; c2020.
8. Jagadesh Kumar M. National Education Policy: How does it Affect Higher Education in India?; c2020.
9. Aithal PS, Aithal S. Implementation Strategies of Higher Education Part of National Education Policy 2020 of India towards Achieving its Objectives. International Journal of Management, Technology, and Social Sciences; c2020.
10. Maruthavanan M. A Study on the Awareness on New Education Policy (2019) among the Secondary School Teachers in Madurai District. Shanlax International Journal of Education; c2020.
11. Goel S, Bhardawaj A. A Critical Analysis of Augmented Learning by Applicability of IT Tools. International Journal of Information and Computation Technology; c2014.
12. Bhardawaj A, Pandey A, Rani D, Oberoi A, Mathur D. Comparative Assessment of E-learning and Traditional Teaching Methods in Higher Education. Education; c2019.
13. Arora C, Kaur C, Gupta A, Bhardawaj A. A review of recent E-learning trends: implementation and cognitive styles. Int. J. Inform. Comput. Technol; c2014.
14. Sehra S, Maghu S, Bhardawaj A. Comparative analysis of E-learning and distance learning techniques. International Journal of Information & Computation Technology; c2014.